Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४८४ 'लिंग पुराणे,

Title राम नाम सहस्रम्

Author x

Extent १४ Age x

Subject (पु० माहात्म्य

© Dharmartha Trust J&K. Digitized by eGangotri

रामनामसहस्रम् लिंगपुराणे

५५८५

5585

F = 15

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

रामस०

॥ श्री रामायनमः॥ सूत उवाच ॥ एकदा सुखमासीनौ पार्वतीपरमेश्वरौ ॥ स्व-

र्णोन्नात्रिशिखरस्थौ द्वन्द्वलोककरक्षणतत्परौ ॥१॥ इन्द्रादिलोकपालैश्च सेवितौ त्रिपुरा-

न्तरौ ॥ पार्वती परिपप्रच्छ तदा धर्मानन्वनुक्रमात् ॥२॥ पार्वत्युवाच ॥ मन्नाथ जग-

तां नाथ सर्वलोकमहेश्वर ॥ त्वत्प्रसादान्मया ज्ञातं धर्मशास्त्रमनुत्तमं ॥३॥ प्राय-

श्चित्तं तु पापानां कृतं सर्वमशेषतः ॥ ब्रह्महत्यादिपापानां निष्कृतिं वक्तुमर्हसि

४॥ महादेव उवाच ॥ शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ॥ सनत्कुमारविप्रे-

न्द्रासंवादं पापनाशनं ॥५॥ उपविष्टं गणाध्यक्षमेकान्ते त्रिशिपत्यसः ॥ सनत्कु-

मारः पप्रच्छ सर्वधर्मविदांवरः ॥६॥ सनत्कुमार उवाच ॥ भगवन् सर्वधर्मज्ञ सर्ववि- १

© Dharmartha Trust J&K. Digitized by eGangotri

घ्नविनाशन ॥ द्विजहत्याहरं धर्मं बकुमर्हसि मे प्रभो ॥ ७ ॥ भवद्भिनास्य धर्मस्य
वक्ता नास्ति जगत्त्रये ॥ विनायक उवाच ॥ साधु पृष्टं त्वया ब्रह्मन् सर्वलोकोप
कारकं ॥ ८ ॥ मया चिरं कृतं कर्म स्मारितं भवतानघ ॥ पुराहं गजरूपेण जातः
पर्वतसंनिभः ॥ ९ ॥ मत्तो वृक्षान् समुत्पाट्य मुनिहिंसां समारभे ॥ तदा मया मुनि
गणा हिंसिता बहवो बलात् ॥ १० ॥ हाहाकारो महानासी ब्राह्मणानां समंततः ॥
तदा हत्यासहस्रेण वेष्टितः परितो ह्यहं ॥ ११ ॥ निःसंज्ञं मृततुल्यं मां वीक्ष्य देवः
पितामहः ॥ त्वाराध्य जगतामीशं रामं सर्वहृदि स्थितं ॥ १२ ॥ तत्पाद्मम करोद्दे
वं मद्धेतो रघुनंदनं ॥ तदा प्रोवाच भगवान् श्रीरामः पितरं मम ॥ १३ ॥ प्रसन्नो

© Dharmartha Trust J&K. Digitized by eGangotri

स्मि महादेव किं मां प्रार्थयसे प्रभो ॥ दास्यामि यदभीष्टं तत्त्रिषु लोकेषु दुर्लभं ॥ १४
महादेव उवाच ॥ द्विजहत्यासमाविष्टमुमापुत्रमिमं प्रभो ॥ निःपापं कुरु देवेश
यद्यस्ति मयि ते दया ॥ १५ ॥ तथेत्युक्त्वा तदा तेन दयया वीक्षितोऽस्म्यहं ॥ तत्क्षणा
ध्वस्तश्चैतस्मान्निर्मलज्ञानबृंहितः ॥ १६ ॥ वक्तुं निर्गद्य यच्छ्रेयस्तु त्वां तं प्रणतो
ऽस्म्यहं ॥ श्रीरामोवाच ॥ द्विजहत्यासहस्रस्य प्रायश्चित्तं वदामि ते ॥ १७ ॥ तपन्ना
मसहस्रं मे हत्याकोटिनिकृन्तनं ॥ इति गुह्यं ददौ रामः स्वस्य नामसहस्रकं ॥ १
८ ॥ तस्मात्क्षणाद्देव निःपापोऽस्मि तदैव हि ॥ तदादि सर्वदेवानां पूज्योऽस्मि मुनि
सत्तम ॥ १९ ॥ त्वमप्येतदधीयानो राघवस्य महात्मनः ॥ नाम्नां सहस्रं लोकेषु प्रख्या

© Dharmartha Trust J&K. Digitized by eGangotri

पयमहामते ॥२०॥ सनत्कुमार उवाच ॥ धन्योस्म्यनुगृहीतोस्मि कृतार्थोस्मि गणा
धिप ॥ त्वत्प्रसादान्मया प्राप्तं रामनामसहस्रकं ॥२१॥ महादेव उवाच ॥ इतिवि
ज्ञाप्य देवेशं परिक्रम्य प्रणम्य च ॥ तदादि सततं जप्त्वा स्तोत्रमेतद्वरानने ॥२२
त्वं वा स परमां सिद्धिं पुण्यपापविवर्जितः ॥ पार्वत्युवाच ॥ श्रोतुमिच्छामि देवे
श तदहं सर्वकामदं ॥२३॥ नाम्नां सहस्रं रामस्य ब्रूहि यद्यस्ति मे दया ॥ महादे
व उवाच ॥ अथ वक्ष्यामि ते देवि रामनामसहस्रकं ॥२४॥ शृणुष्वैकमनाः स्तो
त्रं गुह्याद्गुह्यतमं महत् ॥ ऋषिर्विनायकस्यास्यानुष्टुप्छंदः एव च ॥२५॥ ॐ अस्य
स्य श्रीरामसहस्रनामस्तोत्रमालामंत्रस्य विनायक ऋषिः गायत्री छंदः श्रीरा

© Dharmartha Trust J&K. Digitized by eGangotri

रा० स० ३

मः परमात्मा देवता ॥ श्री मान्महाविष्णुरिति बीजं ॥ गुणत्रन्निर्गुणो महानि
ति शक्तिः ॥ सच्चिदानंदविग्रह इति कीलकं ॥ श्रीराम प्रीत्यर्थे जपे विनियोगः
। विनायकाय ऋषये नमः शिरसि ॥ गायत्री छंदसे नमो मुखे ॥ श्रीरामाय परमा
त्मने देवतायै नमो हृदये ॥ श्रीमान्महाविष्णुरिति बीजाय नमो गुह्ये ॥ गुणत्रन्निर्गु
णो महानिति शक्तये नमः पादयोः ॥ सच्चिदानंदविग्रह इति कीलकाय नमो ना
भौ ॥ अथांगन्यासः ॥ श्री रामचंद्राय नम इत्यंगुष्ठाभ्यां नमः ॥ सीतापतये नम इ
ति तर्जनीभ्यां नमः ॥ रघुनाथाय नम इति मध्यमाभ्यां नमः भरताग्रजाय नम इ
त्यनामिकाभ्यां नमः ॥ दशरथात्मजाय नम इति कनिष्ठिकाभ्यां नमः ॥ हनुमत्प्र ३

© Dharmartha Trust J&K. Digitized by eGangotri

न्मवे नमः इति करतलकरपृष्ठाभ्यां नमः॥ श्रीरामचंद्राय हृदयाय नमः॥ सीतापत
ये शिरसे स्वाहा॥ रघुनाथाय शिखायै वषट्॥ भरताग्रजाय कवचाय हुं॥ दशर
थात्मजाय नेत्रत्रयाय वौषट्॥ हनुमत्प्रभवे अस्त्राय फट्॥ अथ ध्यानं॥ ध्यायेदा
जानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतं वासो वसानं मुखकमलदलस्प
र्द्धिनेत्रं प्रसन्नं॥ वामांकारूढसीतामुखकमलमिलल्लोचनं नीरदाभं नानाल
कारदीप्तं दधतमुरुजटामंडितं रामचंद्रं॥१॥ इति ध्यानमः॥ परब्रह्मात्मको रा
मो देवताश्रुतदर्शने॥ सौवर्णे मंडपे दिव्ये पुष्पके तु विराजिते॥२॥ मूले कल्प
तरोः स्वर्णपीठे सिंहाष्टसंयुते॥ मृदुश्लक्ष्णतरे तत्र जानक्या सह संस्थितं॥३

© Dharmartha Trust J&K. Digitized by eGangotri

रामं नीलोत्पलश्यामं द्विभुजं पीतवाससं। स्मितवक्त्रं सुखासीनं पद्मपत्रनि
भेक्षणं ॥ २८ ॥ किरीटहारकेयूरकुंडलैः कटकादिभिः। विभ्राजमानं विज्ञान
मुद्रावीरासने स्थितं ॥ २९ ॥ स्फुरन्तं तंस्तनयोरग्रे ज्ञानकाः सव्यपाणिना वसि
ष्ठवामदेवाद्यैः सेवितं लक्ष्मणादिभिः ॥ ३० ॥ अयोध्यानगरे रम्ये ह्यभिषिक्तं रघू
द्वहं। एवं ध्यात्वा जपेन्नित्यं राम नाम सहस्रकं ॥ ३१ ॥ हत्याकोटियुतो वापि मुच्य
ते नात्र संशयः॥ राजीवलोचनः श्रीमान् श्रीरामो रघुपुंगवः ॥ ३२ ॥ रामभद्रः
सदाचारो राजेंद्रो जानकीपतिः। अग्रगण्यो वरेण्यश्च वरदः परमेश्वरः ॥ ३३
जनार्दनो जितामित्रः परार्थैकप्रयोजनः। विश्वामित्रप्रियो दांतः शत्रुजि च्छ

ॐ अस्य श्रीरामसहस्रनाममालामंत्रस्य महादेव ऋषिः अनुष्टुप् छंदः श्रीरामः पर
मात्मा देवता श्रीरामप्रीत्यर्थे जपे विनियोगः अथ ध्यानं ॐ [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

त्तुतापनः ॥३४॥ सर्वज्ञः सर्वदेवादिः शरण्यो वालिमर्दनः ॥ ज्ञानभाव्योपरिच्छेद्यो
वाग्मी सत्यव्रतः शुचिः ॥३५॥ ज्ञानगम्यो दृढप्रज्ञः खरध्वंसी प्रतापवान् ॥ द्युति
मानात्मवान्वीरो जितक्रोधोरिमर्दनः ॥३६॥ विश्वरूपो विशालाक्षः प्रभुः परिवृ
ढो दृढः ॥ ईशः खड्गधरः श्रीमान्कौशलेयो नसूयकः ॥३७॥ विपुलांसो महो
रस्कः परमेष्ठी परायणः ॥ सत्यव्रतः सत्यसंधो गुरुः परमधार्मिकः ॥३८॥ लोक
ज्ञो लोकवंद्यश्च लोकात्मा लोककृत्परः ॥ अनादिर्भगवान्सेव्यो जितमायो
रघूद्वहः ॥३९॥ रामो दयाकरो दक्षः सर्वज्ञः सर्वपावनः ॥ ब्रह्मण्यो नीतिमान्गो
प्ता सर्वदेवमयो हरिः ॥४०॥ सुंदरः पीतवासाश्च सूत्रकारः पुरातनः ॥ सौम्यो

© Dharmartha Trust J&K. Digitized by eGangotri

महर्षिःकोदंडीसर्वज्ञिस्सर्वगोचरः॥४१॥कविःसुग्रीववरदःसर्वपुण्याधिकप्रदः
।भव्योजितारिषड्वर्गोमहोदारोघनाशनः॥४२॥सुकीर्त्तिरादिपुरुषःकांतपुण्य
ःकृतागमः॥अकल्मषश्चतुर्बाहुःसर्वावासोदुरासदः॥स्मितभाषीनिवृत्तात्मा
स्मितवान्वीर्यवान्प्रभुः॥४३॥धीरोदारोघनश्यामःसर्वायुधविशारदः॥अध्या
ध्यात्मयोगनिलयःसुमनालक्ष्मणाग्रजः॥४४॥सर्वतीर्थमयःशूरःसर्वयज्ञफ
लप्रदः॥यज्ञस्वरूपीयज्ञेशोजरामरणवर्जितः॥४५॥वर्णाश्रमगुरुर्वर्णीशत्रुजि
त्पुरुषोत्तमः॥शिवलिंगप्रतिष्ठातापरमात्मापरायणः॥४६॥प्रमाणभूतो
दुर्ज्ञेयःपूर्णःपरपुरंजयः॥अनंतदृष्टिरानंदोधनुर्वेदोधनुर्द्धरः॥४७॥गुणाक

© Dharmartha Trust J&K. Digitized by eGangotri

रोगुणश्रेष्ठः सच्चिदानंदबिग्रहः ॥ अखिलाद्यो महाकायो विश्वकर्मा विशारदः
४८ ॥ विनीतात्मा वीतरागस्तपस्वीशो जनेश्वरः ॥ कल्याणप्रकृतिः कल्पः सर्वे
शः सर्वकामदः ॥ ४९ ॥ स्वकृरः पुरुषः साक्षी केशवः पुरुषोत्तमः ॥ लोकाध्य
क्षो महाकायो बिभीषणबरप्रदः ॥ ५० ॥ आनंदबिग्रहो ज्योतिर्हनुमत्प्रभुरक्षयः
॥ भ्राजिष्णुः सहनो भोक्ता सत्यवादी बहुश्रुतः ॥ ५१ ॥ सुखदः कारणं कर्ता भव
बंधबिमोचनः ॥ देवचूडामणिर्नेता ब्रह्मण्यो ब्रह्मवर्द्धनः ॥ ५२ ॥ संसारतारको रामः
सर्वदुःखबिमोक्षकृत् ॥ विद्वत्तमो बिश्वकर्ता विश्वहर्ता च विश्वकृत् ॥ ५३ ॥ नि
त्यो नियतकल्याणः सीताशोकविनाशकृत् ॥ काकुत्स्थः पुंडरीकाक्षो विश्वा

© Dharmartha Trust J&K. Digitized by eGangotri

मित्रभयापहः ॥५४॥ मारीचमथनो रामो विराधवधपंडितः ॥ दुःस्वप्ननाशनो र
म्यः किरीटी त्रिदशाधिपः ॥५५॥ महाधनुर्महाकायो भीमो भीमपराक्रमः ॥ त
त्त्वस्वरूपी तत्त्वज्ञस्तत्त्ववादी सुविक्रमः ॥५६॥ भूतात्मा भूतकृत्स्वामी कालज्ञानी
महापटुः ॥ अनिर्विण्णो गुणग्राही निष्कलंकः कलंकहा ॥५७॥ स्वभावभद्रः
शत्रुघ्नः केशवः स्थाणुरीश्वरः ॥ भूतादिः शंभुरादित्यः स्थविष्ठः स्थविरो ध्रुवः
॥५८॥ कवची कुंडली चक्री खड्गी भक्तजनप्रियः ॥ अमृत्युर्जन्मरहितः सर्वजि
त्सर्वगोचरः ॥५९॥ अनुत्तमोऽप्रमेयात्मा सर्वादिर्गुणसागरः ॥ समः समात्मा
समगो जटामुकुटमंडितः ॥६०॥ अजेयः सर्वभूतात्मा विष्वक्सेनो महातपाः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

लोकाध्यक्षोमहाबाहुरमृतोवेदवित्तमः ॥६१॥ सहिष्णुःसद्गतिःशास्ताविश्वयो-
निर्महाद्युतिः ॥ अतीन्द्रऊर्जितःप्रांशुरुपेन्द्रोवामनोबलिः ॥६२॥ धनुर्वेदोविधा-
ताचब्रह्माविष्णुश्चशंकरः हंसोमरीचिर्गोविंदोरत्नगर्भोमहाद्युतिः ॥६३॥ व्यासो श्री वै ६
वाचस्पतिःसर्वदर्पितासुरमर्दनः ॥ जानकीवल्लभःपूज्यःप्रकटःप्रीतिवर्द्धनः
॥६४॥ संभवोतीन्द्रियोवेद्योनिर्देश्योजांबवत्प्रभुः ॥ मदनोमादनोव्यापीविश्वरू-
पोनिरंजनः ॥६५॥ नारायणोग्रणीःसाधुर्जटायुप्रीतिवर्द्धनः ॥ नैकरूपोजगन्ना-
थःसुरकार्यहितःप्रभुः ॥६६॥ जितक्रोधोजितारातिःप्लवगाधिपराज्यदः ॥ व-
सुदःसुभगोनैकमायोभव्यःप्रमोदनः ॥६७॥ चंडांशुःसिद्धसंकल्पःशरणागं

© Dharmartha Trust J&K. Digitized by eGangotri

रा॰स॰
७
7

तवत्सलः ॥ स्वंगदो रोगहर्त्ता च मंत्रविद्या स्वभावनः ॥ ६८ ॥ सौमित्रिवत्सलो नव्यो
व्यक्ताव्यक्तस्वरूपधृक ॥ विशिष्टो ग्रामणीः श्रीमाननुकूलः प्रियंवदः ॥ ६९
स्वतुलः सात्विको धीरः शरासनविशारदः ॥ ज्येष्ठः सर्वगुणोपेतः शक्तिमा-
स्ताडकांतकः ॥ ७० ॥ वैकुंठः प्राणिनां प्राणः कमठः कमलापतिः ॥ गोवर्द्धन
धरो मत्स्यरूपः कारुण्यसागरः ॥ ७१ ॥ कुंभकर्णप्रभेत्ता च गोपीगोपालसंवृ
तः ॥ मायावी व्यापको व्यापी रेणुकेयबलापहः ॥ ७२ ॥ पिनाकमथनो वंद्यः-
समर्थो गरुडध्वजः ॥ लोकत्रयाश्रयो लोकचरितो भरताग्रजः ॥ ७३ ॥ श्रीधरःऊँ स
तिर्लोकसाक्षी नारायणो बुधः ॥ मनोरूपी मनोवेगी पूर्णः पुरुषपुंगवः ॥ ७४ ७

© Dharmartha Trust J&K. Digitized by eGangotri

यज्ञश्रेष्ठो यज्ञपतिर्मूर्त्तावासः सुविक्रमः ॥ तेजोधराधरो व्यग्रश्चतुर्मूर्त्तिश्चतु
र्भुजः ॥७५॥ बाणासुरमर्दनो वंद्यः शांतो नरतवंदितः ॥ श्राद्धातिगो गभीरात्मा को
मलांगः प्रभाकरः ॥७६॥ लोकोर्द्ध्वगः शेषशायी क्षीराब्धिनिलयोऽनलः ॥ स्वा
त्मयोनिरयोनिश्च सप्तजिह्वः सहस्रपात् ॥७७॥ स्वमृतांतमहागर्भो निवृत्ता
विषयस्पृहः ॥ त्रिकालज्ञो मुनिः साक्षी विहायसगतिः कृती ॥७८॥ पर्जन्यः
कुमुदो भूतावासः कमललोचनः ॥ श्रीवत्सवक्षाः श्रीवासो वीरहा लक्ष्मणा
ग्रजः ॥७९॥ लोकाभिरामो लोकारिमर्दनः सेवकप्रियः ॥ सनातनतमो मेघश्याम
लो राक्षसांतकृत् ॥८०॥ दिव्यायुधधरः श्रीमानप्रमेयो जितेंद्रियः ॥ भूदेव

© Dharmartha Trust J&K. Digitized by eGangotri

वंद्यो जनकप्रियकृत्प्रपितामहः ॥ ८१ ॥ उत्तमः सात्विकः सत्यः सत्यसंधस्त्रिवि
क्रमः ॥ सुलग्नः सुव्रतः सूक्ष्मः सुघोषः सुखदः सुहृत् ॥ ८२ ॥ दामोदरोच्युतः
शार्ङ्गी वामनो मथुराधिपः ॥ देवकीनंदनः शौरिः शार्ङ्गी कैटभमर्दनः ॥ ८३ ॥
सप्ततालप्रभेत्ता च मित्रवंशप्रवर्द्धनः ॥ कालस्वरूपी कालात्मा कालः कल्या
णदः कविः ॥ ८४ ॥ संवत्सरो ऋतुः पक्षो ह्ययनो दिवसो युगः ॥ स्तव्यो विविक्तो
निर्लेपः सर्वव्यापी निराकुलः ॥ ८५ ॥ अनादिनिधनः सर्वलोकपूज्यो निरा
मयः ॥ रसो रसज्ञः सर्वज्ञो लोकसारो रसात्मकः ॥ ८६ ॥ सर्वज्ञः ख्यातिगो विद्या
राशिः परमगोचरः ॥ शेषो विशेषो विगतकल्मषो रघुपुंगवः ॥ ८७ ॥ वर्णश्रेष्ठो व

© Dharmartha Trust J&K. Digitized by eGangotri

र्णनाभो वर्णो वर्णगुणोज्ज्वलः ॥ कर्मसाक्षी गुरुश्रेष्ठो देवासुरनमस्कृतः ॥ ८८ ॥
देवाधिदेवो देवर्षिर्देवासुरवरप्रदः ॥ सर्वदेवमयश्चक्री शार्ङ्गपाणिरनुत्तम
ः ॥ ८९ ॥ मनोबुद्धिरहंकारः प्रकृतिः पुरुषोऽव्ययः ॥ न्यायो न्यायी नयी श्रीमान्न
गो नगधरो ध्रुवः ॥ ९० ॥ लक्ष्मीविश्वंभरो भर्त्ता देवेन्द्रो बलिमर्दनः ॥ बाणारिम
र्दनो यज्वानुत्तमो मुनिसेवितः ॥ ९१ ॥ देवाग्रणीः शिवध्यानतत्परः परमेश्वरः ॥
सामगेयप्रियोऽक्रूरः पुण्यकीर्त्तिः सुलोचनः ॥ ९२ ॥ पुण्यः पुण्याधिकः पूर्वः पूर्णः पू
रयिता रविः ॥ जटिलः कल्मषध्वान्तप्रभंजनविभावसुः ॥ ९३ ॥ अव्यक्तलक्षणो
व्यक्तो दशास्यद्विपकेसरी ॥ कलारूपः कमलानंदवर्द्धनः ॥ ९४ ॥ जयी जरारिः सर्वा
कलानिधिः

© Dharmartha Trust J&K. Digitized by eGangotri

रामस०
९

घश्यामनोमवक्त्रंतनः॥ स्वलंकरिष्णुरचलोरोचिष्णुर्विक्रमोत्तमः॥९५॥ आशुःशा
ब्दपतिःशब्दगोचरोनंदनोलघुः॥ निंद्राष्ट्रपंचवोमायीस्थूलसूक्ष्मविचक्षणः॥९६॥ स ९२
नातनतमःस्रग्वीपेशलोजीविनांवरः॥ शक्तिमानशंखभृन्नाथोगदापद्मरथांग
धृक्॥९७॥ निरीहोनिर्विकल्पश्चचिद्रूपोजितसाध्वसः॥ शताननःसहस्राक्षःशा
तमूर्त्तिर्घनप्रभः॥९८॥ हृत्पुंडरीकशायनःकठिनोद्रवएवच॥ उग्रोग्रहपतिःकृ
ष्णःसमर्थोनर्थनाशनः॥९९॥ अधर्मशत्रुरक्षय्यःपुरुहूतःपुरुष्टुतः॥ ब्रह्मग
र्भोबृहद्गर्भोधर्मधेनुर्धनागमः॥१००॥ हिरण्यगर्भोज्योतिष्मान्सुललाटःसु
विक्रमः॥ शिवपूजारतःश्रीमान्भवानीप्रियकृद्वशी॥१॥ नरोनारायणोरामः ९

© Dharmartha Trust J&K. Digitized by eGangotri

कपर्दी नीललोहितः॥ रुद्रः पशुपतिः स्थाणुर्विश्वामित्रो द्विजेश्वरः॥२॥ मातामहो
मातरिश्वा विरंचो विष्टरश्रवाः॥ अक्षोभ्यः सर्वभूतानां चंडः सत्यपराक्रमः॥३
वालखिल्यो महीकल्पः कल्पवृक्षः कलाधरः॥ निदाघस्तपनो मेघः श्लक्ष्णः प
रबलापहृत्॥४॥ कबंधमथनो दिव्यः कंबुग्रीवः शिवप्रियः॥ सुखानिलः सुनिष्प
न्नः सुरभिः शिशिरात्मकः॥५॥ असंसृष्टोऽतिथिः शूरः प्रमाथी पापनाशकृत्॥ व
सुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः॥६॥ रामो नीलोत्पलश्यामो ज्ञानस्कं
धो महाद्युतिः॥ पवित्रपादः पापारिर्मणिपूरो नभोगतिः॥७॥ उत्तारणो दुःकृति
हा दुर्धर्षो दुःसहोऽभयः॥ अमृतेशोऽमृतवपुर्धर्मी धर्मः कृपाकरः॥८॥ भगो विव

© Dharmartha Trust J&K. Digitized by eGangotri

स्वानादित्योयोगाचार्योदिवस्पतिः॥ उदारकीर्त्तिरुद्योगी वाङ्मयः सदसन्मयः
र्॥ नक्षत्रमाली नाकेशः स्वाधिष्ठानः खगाश्रयः॥ चतुर्वर्गफलं वर्गी शक्तित्र
यफलं निधिः॥१०॥ निधानगर्भो निर्व्याजो निरीशो हिजमर्दनः॥ श्रीवल्लभः शिवा नार
रंभः शांतो भद्रः समंजसः॥११॥ भूशायी भूतकृद्भूतिर्भूषणो भूतवाहनः॥ अका
यो भक्तकायस्थः कालज्ञानी महापटुः॥१२॥ परार्द्ध्यवृत्तिस्वचलो विविक्तः श्रुति
सागरः॥ स्वभावभद्रो मध्यस्थः संसारभयनाशनः॥१३॥ वेद्यो वैद्यो वियद्गोप्तास
र्वामरमुनीश्वरः॥ सुरेंद्रः कारणं कर्मकरः कर्म्यधोक्षजः॥१४॥ धैर्योग्र्यधुर्योगा
त्रीशः संकल्पः शार्वरीपतिः॥ परमार्थगुरुर्दृष्टिः शुचिराश्रितवत्सलः॥१५॥ विष्णु

© Dharmartha Trust J&K. Digitized by eGangotri

जिष्णुर्विष्णुर्यज्ञो यज्ञेशो यज्ञपालकः ॥ प्रभविष्णुर्ग्रसिष्णुश्च लोकात्मा लोकभाव
नः ॥ १६ ॥ केशवः केशिहा काव्यः कविः कारणकारणं ॥ कालकर्त्ता कलाशे
षो वासुदेवः पुरुष्टुतः ॥ १७ ॥ आदिकर्त्ता वराहश्च माधवो मधुसूदनः ॥ नारायणो
नरो हंसो विष्वक्सेनो जनार्दनः ॥ १८ ॥ विश्वकर्त्ता महायज्ञो ज्योतिष्मान्पुरुषोत्त
मः ॥ वैकुंठः पुंडरीकाक्षः कृष्णः सूर्यः सुरार्चितः ॥ १९ ॥ नारसिंहो महाभीमो वक्र
दंष्ट्रो नखायुधः ॥ आदिदेवो जगत्कर्त्ता योगीशो गरुडध्वजः ॥ २० ॥ गोविंदो गोपति
र्गोप्ता भूपतिर्भुवनेश्वरः ॥ पद्मनाभो हृषीकेशो धाता दामोदरः प्रभुः ॥ २१ ॥ त्रिवि
क्रमस्त्रिलोकेशो ब्रह्मेंद्रः प्रीतिवर्द्धनः ॥ वामनो दुष्टदमनोपेंद्रो गोपतिवल्लभः ॥ २२

© Dharmartha Trust J&K. Digitized by eGangotri

रामस॰
११

म कृत्प्रियोच्युतः सत्यः सत्यकीर्त्तिर्धृतिः स्मृतिः ॥ कारुण्यः करुणावासः पापहा स
त्यवर्द्धनः ॥ २३ ॥ संन्यासी शास्त्रतत्त्वज्ञो मंदरो गिरिकेतनः ॥ बदरीनिलयः शांतस्त
पस्वी वैद्युतप्रभः ॥ २४ ॥ भूतावासो गुहावासः श्रीनिवासः श्रियः पतिः ॥ तपोवा
सो मुदावासः सत्यवासः सनातनः ॥ २५ ॥ पुरुषः पुष्करः पुण्यः पुष्कराक्षो महेश्व
रः ॥ पूर्णः पूर्त्तिः पुराणज्ञः पुण्यगः पुण्यवर्द्धनः ॥ २६ ॥ शंखी चक्री गदी शार्ङ्गी लांग
ली मुशली हली ॥ किरीटी कुंडली हारी मेखली कवची ध्वजी ॥ २७ ॥ योद्धा जेता म
हावीर्यः शत्रुघ्नः शत्रुतापनः ॥ शास्ता शास्त्रकरः शास्त्रं शंकरः सततस्तुतः ॥
२८ ॥ सारथिः सात्विकः स्वामी सामवेदप्रियः समः ॥ सबलः साहसः शाकः संपू ११

© Dharmartha Trust J&K. Digitized by eGangotri

णागः समृद्धिमान्॥ २९॥ स्वर्गदः कामदः श्रीदः कीर्त्तिदः कीर्त्तिनायकः॥ मोक्षदः
पुंडरीकाक्षः क्षीराब्धिकृतकेतनः॥ ३०॥ सर्वात्मा सर्वलोकेशः प्रेरकः पापनाश
नः॥ सर्वदेवो जगन्नाथः सर्वलोकमहेश्वरः॥ ३१॥ सर्गस्थित्यंतकृद्देवः सर्वलोक
सुखावहः॥ अक्षयः शाश्वतोऽनंतः क्षयवृद्धिविवर्जितः॥ ३२॥ निर्लेपो निर्गुणः
सूक्ष्मो निर्विकारो निरंजनः॥ सर्वोपाधिविनिर्मुक्तः सत्तामात्रव्यवस्थितः॥ ३३॥
अचलो निर्मलो व्यापी नित्यतृप्तो निराश्रयः॥ अविकारी विभुर्नित्यः परमात्मा
सनातनः॥ ३४॥ तरुणो युवा लोहिताक्षो दीप्तास्यो मितभाषितः॥ आजानुबाहुः
सुमुखः सिंहस्कंधो महाभुजः॥ ३५॥ सत्ववान् गुणसंपन्नो दीप्यमानः स्वतेजसा

© Dharmartha Trust J&K. Digitized by eGangotri

ध्व

रामस० १२ कामात्माभगवान्कालः कालचक्रप्रवर्त्तकः ॥ ३६ ॥ नारायणः परंज्योतिः पर
मात्मासनातनः ॥ विश्वकृद्विश्वभोक्ता च विश्वगोप्ता च शाश्वतः ॥ ३७ ॥ विश्वेश्वरोवि
श्वमूर्त्तिर्विश्वात्माविश्वभावनः ॥ सर्वभूतसुहृच्छांतः सर्वभूतानुकंपनः ॥ ३८ ॥
12 सर्वेश्वरेश्वरः शर्वः सर्वस्याश्रितवत्सलः ॥ सर्वगः सर्वभूतेशः सर्वभूताशय
स्थितः ॥ ३९ ॥ अभ्यंतरस्थस्तमसः छेत्ता नारायणः परः ॥ अनादिनिधनः स्रष्टा
प्रजापतिपतिर्हरिः ॥ ४० ॥ बैकुंठः पुंडरीकाक्षः सर्वदेवनमस्कृतः ॥ अविकारी
विभुर्नित्यः सर्वात्मा सर्वदृग्वशी ॥ ४१ ॥ जगतस्तस्थुषश्चैव प्रभुर्नेतासनात
नः ॥ कर्त्ता धाता विधाता च सर्वेषां पतिरीश्वरः ॥ ४२ ॥ सहस्रमूर्द्धा विश्वात्मा ॥ १२

© Dharmartha Trust J&K. Digitized by eGangotri

विष्णुर्विश्वपदव्ययः॥ पुराणपुरुषः स्रष्टा सहस्राक्षः सहस्रपात्॥४३॥ तत्त्वंनारा
यणो विष्णुर्वासुदेवः सनातनः॥ परमात्मापरंब्रह्मपरंज्योतिः परात्परः॥४४॥ अ
च्युतः पुरुषः कृष्णः शाश्वतः शिवईश्वरः॥ सत्यः सर्वगतः स्थाणुरुग्रः साक्षीप्र
जापतिः॥४५॥ हिरण्यगर्भः सविता लोककृल्लोकभृद्विभुः॥ ॐकारवाच्यो भग
वान्श्रीभूनीलापतिः पुमान्॥४६॥ सर्वलोकेश्वरः श्रीमान्सर्वज्ञः सर्वतोमुख
ः॥ स्वामीसुशीलः सुलभः सर्वज्ञः सर्वशक्तिमान्॥४७॥ नित्यः संपूर्णकामश्च
नैसर्गिकसुहृत्सुखी॥ कृपापीयूषजलधिः शरणंसर्वदेहिनां॥४८॥ श्रीमान्ना
रायणः स्वामी जगतांप्रभुरीश्वरः॥ श्रीशः शरण्योभूतानांसंश्रिताभीष्टदायकः

© Dharmartha Trust J&K. Digitized by eGangotri

४९ अनंतः श्रीपती रामो गुणभृन्निर्गुणो महान् ॥ एवमादीनि नामानि ह्यसंख्या
न्यपराणि च ॥ ५० ॥ उक्तानि तव पुत्रेण विप्रराजेन धीमता ॥ सनत्कुमारेण ब्रा
तान्युक्तानि मयानघे ॥ ५१ ॥ एकैकं रामनामापि सर्वपापप्रणाशनं ॥ सहस्र
नामफलदं सर्वैश्वर्यप्रदायकं ॥ ५२ ॥ सर्वसिद्धिप्रदं नॄणां भुक्तिमुक्तिफलप्र
दं ॥ यः पठेच्छृणुयाद्वापि स तु ब्रह्मपदं लभेत् ॥ मंत्रात्मकमिदं दुरापमाख्यातं
सर्वमंगलं ॥ ५३ ॥ तावद्देवमदस्तेषां महापातकदंतिनां ॥ यावन्न श्रूयते रामना
मपंचाननध्वनिः ॥ ५४ ॥ ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ शरणागा
तघाती च मित्रविश्वासघातकः ॥ ५५ ॥ मातृहा पितृहा चैव भ्रूणहा वीरहा त

© Dharmartha Trust J&K. Digitized by eGangotri

ध्या कोटिकोटिसहस्राणि ह्युपपापानि यान्यपि ५६ संवत्सरं क्रमात्कृत्वा प्रत्यहं ॥
राम संनिधौ निःकल्मषं सुखं मुक्त्वांततो मोक्षमवाप्नुयात् ॥ १५७ ॥ इति श्रीलिं
गपुराणोत्तमाग्र महेश्वर संवादे उत्तरखंडे श्रीरामसहस्रनामस्तोत्रं संपूर्णं ॥ ॥

14

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri